



# अथ श्री वास्तुपुरुष स्तोत्रम्

**श्री गणेशाय नमः ।।**

**श्री स्वामी समर्थाय नमः ।।**

**श्री दत्तात्रेयाय नमः ।।**

**श्री सरस्वत्यै नमः ।।**

अथ ध्यानम्

शांताकारम् रुद्रावतारम् अजानुबाहु च मंद स्मितं ।
सुक्ष्मदर्शनकारी सुलोचनी दु:खहारी भोग मोचकी च ।।
दु:ख प्रारब्ध नाशकारी आल्हाददायी सुख संतोषकारी ।
इदम् स्वामी समर्थ दत्तावतारं वास्तु अधिपती च नमो नमस्ते ।।
पुरान्धकवधे रुद्रललाटात् पतित: क्षितौ ।
स्वेद स्तस्मात् समुद्भूतं भूतमत्यन्त दु:सहम् ।।
गृहीत्वा सहसा देवैर्न्यस्तं भूमावधोमुखम् ।
जानुनी कोणयो:पादौ रक्षोदिशि शिवे शिर: ।।
चत्वारिंशद् युता: पंच वास्तुदेहे स्थिता: सुरा: ।
देव्योष्टौ बाहयगास्तेषां वसनाद्वास्तुरूच्यते ।।
अधोमुखेन विज्ञप्तैस्त्रिदशैर्विहितो बलि: ।
तेनैव बलिना शान्तिं: कुरुते हानिमन्यथा ।।
प्रासाद भवनादीनां प्रारंभे परिवर्तने ।
वास्तुकर्मसु सर्वेषु पूजित: सौख्यदो भवेत् ।।
एकपदादितो वास्तुर्यावत् पदसहस्त्रकम् ।
द्वात्रिन्मंडलानि स्यु: क्षेत्रतुल्याकृतीनि च ।।
एका शीतिपदो वास्तुश्र्चतु:षष्टि पदोऽथवा ।
सर्ववास्तुविभागेषु पूजयेन्मण्डलद्वयम् ।।
ईशो मूर्धनि पर्जन्यो दक्षिणं कर्णमाश्रित: ।
जयस्कन्धे महेन्द्राद्या: पंचलक्षणबाहुगा: ।।
महेन्द्र:सूर्यसत्यश्र्च भृश आकाशमेव च ।
वन्हिर्जानुनि पूषाद्या:सप्तपादनली स्थिता: ।।
पूषा च वितथश्र्चैव गृहक्षतयमावुभौ ।
गंधर्वो भृंगराजश्र्च मृग: सप्त सुरा इति ।।

पादयोः पितरस्तस्मात् सप्तपादतलस्थिता: ।
दौवारिको ऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ।।
असुरः शोषयक्ष्मा च रोगो जानुनि संस्थिताः ।
नागो मुख्यश्च्च भल्लाटः सोमोऽङ्गिराश्च्च बाहुगाः ।।
अदितिस्त्वधदेशे च वामे कर्णे दितिः स्थिता ।
द्वात्रिंशत् बाहयगा देवा नाभिपृष्ठे स्थितो विधीः ।।
अर्यमा दक्षिणे वामे स्तने तु पृथिवीधरः ।
विवस्वानथ मित्रश्च्च दक्षवामोरूगावुभौ ।।
आपस्तुमलकावास्तु राय वत्सो हृदि स्थितः ।
सावित्रः सविता तद्वत् करं दक्षिणमाश्रितौ ।।
इन्द्र इन्द्रजयो मेढ्रे रुद्रोऽसौ वामहस्तके ।
रुद्रदासोऽपि तत्रैव इति वेदमयं वपुः ।।
ईशान्ये चरकी बाहये पिलिपिच्छस्तु पूर्वतः ।
विदारिकाग्निकोणे च विजुम्भाचां दिगामिता ।।
नैर्ऋत्ये पूतना स्कन्धे पश्च्चिमे वायुकोणके ।
पाप राक्षसिका सौम्येर्यमं वै सर्वतोऽर्च्चयेत् ।।
देवि क्रुरान्ममन्दीश्च्च माषान्नैः सुरयामिषैः ।
अपरात् वृकानैश्च्च सर्वान् स्वर्णसुगन्धिभिः ।।
इति वास्तुपुरुषन्यासः
इति एवम् वास्तुपुरुषस्य रुपं भवती ।
इदम् स्तोत्रम् स्मरण मात्रेण वास्तुपुरुषस्य कृपाऽशिर्वादं च लभते ।।
सुखसमृद्धि आरोग्यं लाभं करोती ।
भूतादीबाधा वा मारणादी दुष्टशक्तिं प्रनश्यती ।।
यथा कमलदल पद्मस्थित भ्रमरे रक्षां करोती ।
तथा तत् स्वरुपेन वास्तुपुरुषं यजमानस्य ऊपरी कवचं धारयती ।।
।। श्री वास्तुपुरुषाऽपर्णमस्तु ।।

हे वास्तुपुरुषाचे स्तोत्र पठन केल्याने वास्तुपुरुषाचा कृपाशिर्वाद लाभतो.
रोज किमान गुळाचा नैवेद्य तरी वास्तुपुरुषाला दाखवावा
नंतर तो वास्तुपुरुषाच्या नावाने मुंग्यांना ठेवणे. गुळ नसल्यास साखर ठेवावी.
यामुळे वास्तुतील सर्व दोष निवारण केले जातील यात संशय नाही